इति च सुश्रुते उत्तरतन्त्रे षष्टितमोऽध्यायः ॥*॥
"सूतायस्तारमभ्रञ्च मुक्ता चापि समं समम् ।
सूतपादोत्तमं वच्चं तालं गन्धं मनःशिला ॥
तुल्यं रसाञ्जनं शुद्धमश्विपित्तं शिलाञ्जनम् ।
पञ्चानां लवणानाञ्च प्रतिभागं वसोन्मितम् ॥
भृङ्गराजचित्रवन्द्योदुग्धेनापि विमर्द्दयेत् ।
दिनान्ते पिण्डितं कृत्वा रुद्धा गजपुटे पचेत् ॥
भूताङ्कुशो रसो नाम नित्यं गुञ्जाद्वयं लिहन् ।
आर्द्रकस्य रसेनापि भूतोन्मादसवावजित् ॥
पिप्पल्याज्यं पिबेच्चानु दशमूलकषायकम् ।
स्वेदयेत् कटुतुम्ब्या च तीक्ष्णमुष्णञ्च वर्ज्जयेत् ॥
माहिषञ्च घृतं क्षीरं गुर्व्वन्नमपि भक्षयेत् ।
अभ्यङ्गं कटुतैलेन हितो भूताङ्कुशो रसः" ॥
इति भूताङ्कुशो रसः ॥*॥ उन्मादभञ्जिनी वटी यथा ।
"शुद्धं मनःशिलाचूर्णं सैन्धवं कटुरोहिणी ।
वचा शिरीषबीजञ्च हिङ्गुश्च श्वेतसर्षपम् ॥
करञ्जबीजं त्रिकटु मलं पारावतस्य च ।
एतानि समभागानि गोमूत्रैर्वटिकां कुरु ॥
गिरिमल्लीबीजसमां छायाशुष्काञ्च कारयेत् ।
प्रातःसन्ध्यानिशाकाले चक्षुषोरञ्जनं हितम् ॥
मधुना दिवसे चाञ्ज्यं रात्रौ चैव जलेन च ।
वटिकैषा समाख्याता नाम्ना चोन्मादभञ्जिनी ।
चातुर्थकापस्मारघ्ना सर्व्वोन्मादविनाशिनी" ॥
इति वैद्यकरसेन्द्रसारसंग्रहे उन्मादाधिकारे ॥

अथ पथ्यानि यथा ।

"स्नेहो विरेको वमनञ्च पूर्व्वं
क्रमान्मरुत्पित्तकफोद्भवेषु ।
ततः परं वस्तिविधिश्च नस्यम्
सन्तर्ज्जनं ताड़नमञ्जनञ्च ॥१॥
आश्वासनञ्चासनबन्धनानि
भयानि दानानि च हर्षणानि ।
धूमो दमो विस्मरणं प्रदेहः
शिराव्यधः संशमनञ्च सेकः ॥२॥
आश्चर्य्यकर्म्माणि च धूमपानं
धीधैर्य्यसत्त्वात्मनिवेदनानि ।
अभ्यञ्जनं स्नापनमासनञ्च
निद्रासुशीतान्यनुलेपनानि ॥३॥
गोधूममुद्गारुणशालयश्च
धारोष्णदुग्धं शतधौतसर्पिः ।
घृतं नवीनञ्च पुरातनञ्च
कूर्म्मामिषं धन्वरसा रसालम् ॥४॥
पुराणकुष्माण्डफलं पटोलं
ब्राह्मीदलं वास्तुकतण्डुलीयम् ।
खराश्वमूत्रं गगनाम्बुपथ्या
सुवर्णचूर्णानि च नारिकेलम् ॥५॥
द्राक्षाकपित्थं पनसञ्च वैद्यै-
र्विधेयमुन्मादगदेषु पथ्यम्" ॥६॥

"पूजाबल्युपहारशान्तिविधयो होमेष्टिमन्त्रक्रियाः
दानं स्वस्त्ययनं व्रतानि नियमः सत्यञ्जपो मङ्गलम् ॥
प्रायश्चित्तविधानमञ्जनविधीरत्नौषधीधारणं
भूतानामनुकम्पमिष्टचरणं गौरीपतेरर्च्चनम् ॥७॥
ये च स्युर्भुवि गुह्यकाश्च प्रमथास्तेषां समाराधनं
देवब्राह्मणपूजनञ्च शमयेदुन्मादमागन्तुकम्" ॥८॥

अपथ्यानि यथा ॥

"मद्यं विरुद्धाशनमुष्णभोजनं
निद्राक्षुधातृट्कृतवेगधारणम् ।
व्यवायमाषाढ़फलं कठिल्लकं
शाकानि पत्रप्रभवानि सर्व्वशः ॥
तिक्तानि बिम्बी च भिषक् समादिशे-
दुन्मादरोगोपहतेषु गर्हितम्" ॥

इति वैद्यकपथ्यापथ्यविधौ उन्मादाधिकारः ॥*॥) औत्सुक्यसन्तापादिकारितमनोविपर्य्याससमुत्थप्रियाश्रितव्यथाव्यापारः । इति रसमञ्जरी ॥ (व्यभिचारिभावभेदः । यथा, साहित्यदर्पणे ३ । १३६ ।
"औत्सुक्योन्मादशङ्काः स्मृतिमतिसहिता व्याधिसंत्रासलज्जाः" । इति ॥ अस्य लक्षणं सोदाहरणमाह तत्रैव ३ । १५५ ।
"चित्तसम्मोह उन्मादः कामशोकभयादिभिः ।
अस्थानहासरुदितगीतप्रलपनादिकृत्" ॥
उदाहरणम् ।
"भ्रातर्द्विरेफ ! भवता भ्रमता समन्तात्
प्राणाधिका प्रियतमा मम वीक्षिता किम् ?
भ्रङ्कारमनुभूय सानन्दम्—
"ब्रूषे किमोमिति सखे ! कथयाशु तन्मे
किं किं व्यवस्यति कुतोऽस्ति च कीदृशीयम्" ॥)

उन्मादः, त्रि, (उत् + मद् + घञ् ।) उन्मादरोगयुक्तः । क्षिप्तः । उन्मत्तः । इत्यमरटीकायां नीलकण्ठः ॥ पागल इति भाषा ॥

उन्मादनः, पुं, (उन्मादयत्यनेन इति । उत् + मद् + णिच् + ल्युः ) कामदेवस्य पञ्चबाणान्तर्गतबाणविशेषः । इति त्रिकाण्डशेषः ॥

उन्मादवान्, त्रि, (उन्मादो विद्यते अस्य । उन्माद + मतुप् । मस्य वः ।) उन्मादरोगविशिष्टः । उन्मत्तः । इत्यमरः ॥

उन्मानः, पुं, (उत् + मा + ल्युट् ।) द्रोणपरिमाणम् । इति वैद्यकपरिभाषा ॥ ("उन्मानञ्च घटो राशिर्द्रोणपर्य्यायसंज्ञितः" । इति पूर्व्वखण्डे प्रथमेऽध्याये शार्ङ्गधरेणोक्तम् ॥ "स एव कलशः ख्यातो घटमुन्मानमेव च" ॥ इति कल्पस्थाने द्वादशेऽध्याये चरकेणोक्तम् ॥)

उन्मिषितः, त्रि, (उत् + मिष + क्त ।) प्रफुल्लः । विकसितः । इति हेमचन्द्रः ॥ यथा कुमारे ।
"व्यलोकयन्नुन्मिषितैस्तड़िन्मयै-
र्महातपःसाक्ष्य इव स्थिताः क्षपाः" । ५ । २५ ॥

उन्मीलनं, क्ली, (उत् + मील + ल्युट् ।) उन्मेषः । इति हेमचन्द्रः ॥ चक्षुमेला इति भाषा । विकाशः ॥ ("अज्ञानतिमिरान्धस्य लोकस्य तु विचेष्टतः । ज्ञानाञ्जनशलाकाभिर्नेत्रोन्मीलनकारकः" । इति महाभारते । १ । १ । ८४ ॥)

उन्मीलितः, त्रि, (उत् + मील + क्त ।) विकसितः । प्रस्फुटितः । इति हलायुधः ॥ ("उन्मीलितं तूलिकयेव चित्रम्" । इति कुमारे । १ । ३२ ॥ "ते चोन्मीलितमालतीसुरभयः प्रौढ़ाः कदम्बानिलाः" । इति साहित्यदर्पणे १म परिच्छेदे ॥)

उन्मुखः, त्रि, (उदूर्द्ध्वं मुखं यस्य ।) ऊर्द्ध्वमुखः । तत्पर्य्यायः । उत्पश्यः २ । इति हेमचन्द्रः ॥ ("मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः" । इति रघुः । १ । ३९ ।) उत्सुकः । यथा कुमारे । ६ । ३४ ॥ "तस्मिन् संयमिनामाद्ये जाते परिणयोन्मुखे" । "पतिः प्रतीतः प्रसवोन्मुखीं प्रियाम्" । इति रघुः । ३ । १२ ॥ "अद्रेः शृङ्गं हरति पवनः किं स्विदित्युन्मुखीभिः" । इति मेघदूते । पूर्व्वमेघे १४ । "इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा" । इति च मेघदूते उत्तरमेघे ३९ श्लोकः ॥)

उन्मुद्रः, त्रि, (उद्गता मुद्रा यस्मात् ।) प्रफुल्लः । विकसितः । इति त्रिकाण्डशेषः ॥

उन्मूलितं, त्रि, (उत् + मूल् + क्त ।) उत्पाटितम् । इति हेमचन्द्रः ॥ (यथा रामायणे । ५ । ६ । "लङ्कामुन्मूलितां कृत्वा कदा द्रक्ष्यति मां पतिः" ॥)

उन्मेषं, क्ली, (उत् + मिष् + घञ् ।) चक्षुरुन्मीलनम् । इति हेमचन्द्रः ॥ चक्षु मेला इति भाषा । ("खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम्" । इति मेघदूते उत्तरमेघे २० । स्फुरणम् ॥ यथा, "स्वकिरणपरिवेशोन्मेषशून्याः प्रदीपाः" ॥ इति रघुः । ५ । ७४ ॥ विकाशः २ । प्रस्फोटनम् । यथा,—
"दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते" ।
इति कुमारे । २ । ३३ ॥)

उप व्य प्रादिविंशत्युपसर्गान्तर्गतउपसर्गविशेषः । अस्यार्थः । अनुगतिः । पश्चाद्भावः । अनुकम्पा । आधिक्यम् । (यथा पाणिनिः १।४।८७ "उप परार्द्धे हरेर्गुणाः । परार्द्धादधिका इत्यर्थः ।) हीनः । (यथा मुग्धबोधे कारके ७ "विप्राणमन्वर्च्चते भर्गः शक्रादय उपाच्युतम्" ।) सामीप्यम् । (यथा, मुग्धबोधे समासप्रकरणे ६७ । "उपसमिधं उपसमित् । उपनदं । उपनदि" ॥) प्राथम्यम् । इति दुर्गादासः ॥ दाक्षिण्यम् । सामर्थ्यम् । आलयः । भूषणम् । दोषाख्यानम् । निदर्शनम् । आश्चर्य्यकरणम् । दानम् । मारणम् । व्याप्तिः । लिप्सा । उपालम्भनम् । पूजा । उद्योगः । इति शब्दरत्नावली ॥

उपकण्ठं, क्ली, (उपगतः कण्ठम् । अत्यादय इति समासः । उपगतः कण्ठः सामीप्यमस्येति वा ॥) ग्रामान्तम् । तत्पर्य्यायः । उपशल्यम् २ । इति त्रिकाण्डशेषः ॥ आस्कन्दितम् । अश्वप्लुतगतिः । इति हेमचन्द्रः ॥ कण्ठसमीपम् ॥ (यथा, माघे ।
"प्रेम्णोपकण्ठं मुहुरङ्कभाजो-
रत्नावलीरम्बुधिराबबन्ध" ।)

उपकण्ठः, त्रि, (उपगतः कण्ठः सामीप्यमस्य ।) निकटः । इत्यमरः ॥ (यथा, कुमारे । ७ । ५१ ॥
"तस्योपकण्ठे घननीलकण्ठः
कुतूहलादुन्मुखपौरदृष्टः" ॥)

उपकरणं, क्ली, (उप + कृ + ल्युट् ।) प्रधानाङ्गीभूतोपकारकद्रव्यम् । नृपादीनां छत्रचामरादि ।